योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः २०

विंशः सर्गः २०

श्रीराम उवाच ।

बाल्यानर्थमथ त्यक्त्वा पुमानभिहताशयः ।

आरोहति निपाताय यौवनं संभ्रमेण तु ।। १

तत्रानन्तविलासस्य लोलस्य स्वस्य चेतसः ।

वृत्तीरनुभवन्याति दुःखाद्दुःखान्तरं जडः ।। २

स्वचित्तबिलसंस्थेन नानासंभ्रमकारिणा ।

बलात्कामपिशाचेन विवशः परिभूयते ।। ३

चिन्तानां लोलवृत्तीनां ललनानामिवाऽवृतीः ।

अर्पयत्यवशं चेतो बालानामञ्जनं यथा ।। ४

ते ते दोषा दुरारम्भास्तत्र तं तादृशाशयम् ।

तद्रूपं प्रतिलुम्पन्ति दुष्टास्तेनैव ये मुने ।। ५

महानरकबीजेन संततभ्रमदायिना ।

यौवनेन न ये नष्टा नष्टा नान्येन ते जनाः ।। ६

नानारसमयी चित्रवृत्तान्तनिचयोम्भिता ।

भीमा यौवनभूर्येन तीर्णा धीरः स उच्यते ।। ७

निमेषभासुराकारमालोलघनगर्जितम् ।

विद्युत्प्रकाशमशिवं यौवनं मे न रोचते ।। ८

मधुरं स्वादु तिक्तं च दूषणं दोषभूषणम् ।

सुराकल्लोलसदृशं यौवनं मे न रोचते ।। ९

असत्यं सत्यसंकाशमचिराद्विप्रलम्भदम् ।

स्वप्नाङ्गनासङ्गसमं यौवनं मे न रोचते ।। १०

सर्वस्याग्रे सर्वपुंसः क्षणमात्रमनोहरम् ।
गन्धर्वनगरप्रख्यं यौवनं मे न रोचते ।। ११
इषुप्रपातमात्रं हि सुखदं दुःखभासुरम् ।
दाहपोषप्रदं नित्यं यौवनं मे न रोचते ।। १२
आपातमात्ररमणं सद्भावरहितान्तरम् ।
वेश्यास्त्रीसंगमप्रख्यं यौवनं मे न रोचते ।। १३
ये केचन समारम्भास्ते सर्वे सर्वदुःखदाः ।
तारुण्ये संनिधिं यान्ति महोत्पाता इव क्षये ।। १४
हार्दान्धिकारकारिण्या भैरवाकारवानपि ।
यौवनाज्ञानयामिन्या बिभेति भगवानपि ।। १५
सुविस्मृतशुभाचारं बुद्धिवैधुर्यदायिनम् ।
ददात्यतितरामेष भ्रमं यौवनसंभ्रमः ।। १६
कान्तावियोगजातेन हृदि दुःस्पर्शवह्निना ।
यौवने दह्यते जन्तुस्तरुर्दावाग्निना यथा ।। १७
सुनिर्मलापि विस्तीर्णा पावन्यपि हि यौवने ।
मतिः कलुषतामेति प्रावृषीव तरङ्गिणी ।। १८
शक्यते घनकल्लोला भीमा लङ्घयितुं नदी ।
न तु तारुण्यतरला तृष्णातरलितान्तरा ।। १९
सा कान्ता तौ स्तनौ पीनौ ते विलासास्तदाननम् ।
तारुण्य इति चिन्ताभिर्याति जर्जरतां जनः ।। २०
नरं तरलतृष्णार्तिं युवानमिह साधवः ।
पूजयन्ति न तु च्छिन्नं जरत्तृणलवं यथा ।। २१
नाशायैव मदार्तस्य दोषमौक्तिकधारिणः ।
अभिमानमहेभस्य नित्यालानं हि यौवनम् ।। २२
मनोविपुलमूलानां दोषाशीविषधारिणाम् ।
शोषरोदनवृक्षाणां यौवनं बत काननम् ।। २३

रसकेसरसंबाधं कुविकल्पदलाकुलम् ।
दुश्चिन्ताचञ्चरीकाणां पुष्करं विद्धि यौवनम् ।। २४
कृताकृतकुपक्षाणां हृत्सरस्तीरचारिणाम् ।
आधिव्याधिविहंगानामालयो नवयौवनम् ।। २५
जडानां गतसंख्यानां कल्लोलानां विलासिनाम् ।
अनपेक्षितमर्यादो वारिधिर्नवयौवनम् ।। २६
सर्वेषां गुणसर्गाणां परिरूढरजस्तमाः ।
अपनेतुं स्थितिं दक्षो विषमो यौवनानिलः ।। २७
नयन्ति पाण्डुतां वक्रमाकुलावकरोत्कटाः ।
आरोहन्ति परां कोटिं रूक्षा यौवनपांसवः ।। २८
उद्बोधयति दोषालिं निकृन्तति गुणावलिम् ।
नराणां यौवनोल्लासो विलासो दुष्कृतश्रियाम् ।। २९
शरीरपङ्कजरजश्चञ्चलां मतिषट्पदीम् ।
निबध्नन्मोहयत्येष नवयौवनचन्द्रमाः ।। ३०
शरीरखण्डकोद्भूता रम्या यौवनवल्लरी ।
लग्नमेव मनोभृङ्गं मदयत्युन्नतिं गता ।। ३१
शरीरमरुतापोत्थां युवतामृगतृष्णिकाम् ।
मनोमृगाः प्रधावन्तः पतन्ति विषयावटे ।। ३२
शरीरशर्वरीज्योत्स्ना चित्तकेसरिणः सटा ।
लहरी जीविताम्भोधेर्युवता मे न तुष्टये ।। ३३
दिनानि कतिचिद्येयं फलिता देहजङ्गले ।
युवता शरदस्यां हि न समाश्वासमर्हथ ।। ३४
झटित्येव प्रयात्येव शरीराद्युवताखगः ।
क्षणेनैवाल्पभाग्यस्य हस्ताच्चिन्तामणिर्यथा ।। ३५
यदा यदा परां कोटिमध्यारोहति यौवनम् ।
वल्गन्ति सज्वराः कामास्तदा नाशाय केवलम् ३६

तावदेव विवल्गन्ति रागद्वेषपिशाचकाः ।

नास्तमेति समस्तैषा यावद्यौवनयामिनी ।। ३७

नानाविकारबहुले वराके क्षणनाशिनि ।

कारुण्यं कुरु तारुण्ये म्रियमाणे सुतै यथा ।। ३८

हर्षमायाति यो मोहात्पुरुषः क्षणभङ्गिना ।

यौवनेन महामुग्धः स वै नरमृगः स्मृतः ।। ३९

मानमोहान्मदोन्मत्तं यौवनं योऽभिलष्यति ।

अचिरेण स दुर्बुद्धिः पश्चात्तापेन युज्यते ।। ४०

ते पूज्यास्ते महात्मानस्त एव पुरुषा भुवि ।

ये सुखेन समुत्तीर्णाः साधो यौवनसंकटात् ।। ४१

सुखेन तीर्यतेऽम्भोधिरुत्कृष्टमकराकरः ।

न कल्लोलबलोल्लासि सदोषं हतयौवनम् ।। ४२

विनयभूषितमार्यजनास्पदं

करुणयोज्ज्वलमावलितं गुणैः ।

इह हि दुर्लभमङ्ग सुयौवनं

जगति काननमम्बरगं यथा ।। ४३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे यौवनगर्हा नाम विंशतितमः सर्गः ।। २० ।।